# Svami Nigamananda in Utkalapradesh

# ઉત્કલપ્રદેશે સ્વામિનિગમાનન્દઃ

## Document Information

Text title : Svami Nigamananda in Utkalapradesh

File name : utkalapradeshesvAminigamAnandaH.itx

Category : misc, sahitya, article, pradIptakumArananda

Location : doc_z_misc_general

Author : (Copyright) Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

Transliterated by : Pradipta Kumar Nanda

Proofread by : Pradipta Kumar Nanda

Acknowledge-Permission: (Copyright) Pradipta Kumar Nanda

Latest update : May 13, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 14, 2021

*sanskritdocuments.org*

# ઉત્કલપ્રદેશે સ્વામિનિગમાનન્દઃ

લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

સ્વામિનિગમાનન્દઃ ભારતવર્ષસ્ય ચત્વારિ ધામાનિ સપ્તખણ્ડાનિ ચ પરિવ્રાજકરૂપેણ પરિભ્રમ્ય સર્વશેષે ભોગક્ષેત્રં પુરીધામ પ્રત્યાગતવાન્ । ખ્રીષ્ટતઃ ચતુર્વિંશત્યધિકોનવિંશતિશતકાદારભ્યચતુર્ચત્વારિંશદધિકોનવિંશતિશતકપર્યન્તમસૌ મહાત્મા પ્રાયતઃ પુર્યાં નીલાચલકુટીરેઽવસ્થાનં ચકાર ।

દશાધિકોનવિંશતિશતકસ્ય વૈશાખે માસે મહાત્મા નિગમાનન્દઃ પ્રથમતઃ દુર્ગાપુરનામકાશ્રમાત્ કતિપયૈઃ શિષ્યૈઃ સાર્દ્ધં પુરીમાગતવાન્ । તત્પશ્ચાત્તસ્ય મનસિ પુર્યાવસ્થાનં બલવત્તરં સંજાતમ્ । સ એકવિંશત્યધિકોનવિંશતિશતકે સ્વામિસ્વરૂપાનન્દેન સહ પુરીમાગત્ય અશ્વિનીકુમારમહાભાગસ્ય કમલકુટીરે ભાટકરૂપેણ કતિ માસાન્ સ્થિત્વા વંગદેશં પ્રત્યાગત્ય પુનઃ દ્વાવિંશત્યધિકોનવિંશતિશતકે પુરીમાગત્ય “ગોયેંકા” ઇતિ ધર્મશાલાયાં કિયદ્દિનાનિ ઉષિત્વા ચતુર્વિંશત્યધિકોનવિંશતિશતકેઽનેન મહાનુભાવેન નીલાચલકુટીરસ્ય ગૃહપ્રવેશઃ કૃતઃ ।

ઉત્કલાવસ્થાનસમયે સ્વામિનિગમાનન્દઃ ઉત્કલસ્ય બહુવિધસ્થાનાનિ પરિભ્રમ્ય તત્રત્યધર્મપ્રાણમાનવાનાં મનસિ સ્વકીયામૃતવચનસ્ય ગંગાપ્રવાહં કૃત્વા આસનમન્દિરાદીન્ પ્રતિષ્ઠાપ્ય ગુરુગતભક્તાનામન્તઃકરણસિંહાસને “શંકરસ્ય મતં ચૈતનસ્ય પન્થાઃ” ઇતિ તત્ત્વં સમુપસ્થાપ્ય લોકપ્રિયો બભૂવ ।

તન્ત્રજ્ઞાનયોગપ્રેમસાધનચતુષ્ટયસંપન્ન -નિગમાનન્દમતસ્યાલૌકિકતા ઉત્કલભૂમૌ મહત્વપૂર્ણસ્થાનં ભજતે ઇતિ ન વિસંમ્બાદઃ । યતો હિ તદ્દર્શનં મુખ્યતયા પ્રત્યક્ષવાદોપરિ સુપ્રતિષ્ઠિતમાસીત્ ।

ઇદં નિગમાનન્દદર્શનં ન કેવલં મનનશાસ્ત્રમપિતુ અનુભૂતેઃ વિદ્યુત્તરંગરૂપમ્ । અસ્મિન્ દર્શને સંશયસ્ય નાસ્તિ કિમપિ સ્થાનં યેન સંશેત । મનસિ તર્કઃ । ભૌતિકે ગ્લાનિઃ, કિન્તુ બોધિરાજ્યે કુતો વા સંશયઃ કુતો વા વિપર્યયઃ ?

નિગમશબ્દઃ વેદપ્રતિપાદકઃ, સુતરામપૌરુષેયઃ । અતીન્દ્રિયજ્ઞાનપરિપ્લુતઃ । મન્ત્રદ્રષ્ટૃણામસૌ સંક્ષિપ્તવાર્તા । એતસ્માત્ કારણાત્ નિગમસિદ્ધસાધકસ્ય સ્વામિનિગમાનન્દદર્શનસ્ય વિચારધારાયાઃ પુંખાનુપુંખગવેષણં મત્કૃતે નિઃસન્દેહં દુર્બોધમ્, તથાપિ તસ્યોત્કલાવસ્થાનવિષયે કિમપિ યાથાતથ્યં કથયામિ ।

ઉત્કલભૂમૌ સ્વામિનિગમાનન્દસ્ય પ્રભાવઃ સર્વોપરિ શ્રીદુર્ગાચરણમહાન્તિ ઉપરિ નિપતિતઃ । યદ્યપિ તદાનીં પરમહંસસ્ય અન્યે બહવો મન્ત્રશિષ્યાઃ યથા- સર્વશ્રીચૈતન્ય ચરણ દાસ-વનમાલિદાશ-દામોદરદાસ-ઈશ્વરચન્દ્રસાહુ-હરપ્રસાદ-ગોવિન્દચન્દ્રપટ્ટનાયક-શ્રીગુરુદાસ-નૃપાલ એકાદશી-હરિચન્દન-ક્ષીરોદસિંહ-વંશીધરવેહેરા-અશ્વિન્યાદયશ્ચ આસન્ એતેષુ દુર્ગાચરણેન નિગમાનન્દભાવધારાયાઃ પૃષ્ઠપોષકતા સમાચરિતા

। એતસ્માત્ સઃ નીલાચલસારસ્વતસંઘસ્ય પરિચાલકત્વેન નિયુક્તઃ । અસૌ પૂતાત્મા ઉત્કલે સ્વામિનિગમાનન્દમતસ્ય બીજવપનકર્તા આસીત્ । અસ્ય પ્રચેષ્ટયા હિ નિગમાનન્દ દર્શનસમ્બધીય વંગીયગ્રન્થાઃ ઉત્કલભાષયાઽનુવાદિતાઃ, વિસ્તારિતાશ્ચ ।

સ્વામિનિગમાનન્દ આસીદુત્કલીયાનાં કૃતે શાશ્વતપુરુષઃ । તસ્ય સુલલિતં યોગાગ્નિમયશરીરં દૃષ્ટ્વાઽમૃતલિપ્તવાણીં ચ શ્રુત્વા બહવોત્રત્યજનાઃ તસ્ય શિષ્યત્વેન પરિણતાઃ સન્તઃ તં સ્વકીયં ગુરુરૂપેણ સ્થાપયામાસુઃ ।

તત્ત્વતો નિગમાનન્દ-જીવનધારા આસીદલૌકિકી । તજ્જીવનદર્શનમપિ અમાવાસ્યાયાં ચન્દ્રપ્રકાશરૂપમ્ । ભારતીયસાધના નિગમાનન્દદર્શને તરંગાયિતા । તત્ત્વપિપાસૂનાં હૃદયકમલે અદ્યાવધિ ચિરન્તની । તસ્યાદેશ ઉપદેશશ્ચ ઔત્કલીયાનામન્તઃકરણે અનિર્વચનીય અલંઘનીયઃ । યચ્ચોક્તં પરમર્ષિણા-

“વત્સ ! અહં સદ્ગુરુઃ । જગદ્ગુરોરિચ્છા હિ મયિ લીલાયિતા । યુષ્માકં મુક્તિમાર્ગં પ્રદર્શયિતું મમ વિકાશઃ । યે મયિ પૂર્ણનિર્ભરાસ્તાનહં હસ્તે ધૃત્વા મુક્તિધામ નેષ્યામિ” । શિષ્યભક્તાન્ પ્રતિ મહાત્મનઃ સ્નેહ આસીદનાવિલઃ । અસૌ મહાત્મા વારમ્બારં સ્વશિષ્યાન્ આત્મસમર્પણકર્તુંમુપદિદેશ । તથાહિ- “વત્સ! મમ નિર્દેશઃ યુષ્માકં પક્ષે ન કષ્ટતરઃ । યતો હિ સાધનદશાયાં મયા સકલં કૃચ્છ્રમંગીકૃતમ્ । અધુના યુષ્માકં પૃથક્ સાધનાયાઃ નાસ્તિ કાચિત્ આવશ્યકતા । મમ પ્રાણેષુ તવ પ્રાણાન્ મમેચ્છાયાં તવેચ્છાં ચ સંયોજયન્ મદુપદિષ્ટ-જગદ્ધિતકરકાર્યેષુ રતો ભવ । મમ સાધનાયાઃ સકલં ફલં લપ્સ્યતે” । અસૌ આત્મસમર્પણયોગઃ । ઇયમેવ યુષ્માકં કૃતે બલિષ્ઠા સાધના । નિગમાનન્દજીવનદર્શનં પરમં તથા ચરમમાસીત્ તચ્છિષ્યાનાં કૃતે । તન્મતે શિષ્યસ્ય ભક્તિમાધ્યમેન હિ ગુરૌ ગુરુત્વસ્યાવિર્ભાવઃ । યત્ર ભક્તિર્નાસ્તિ તત્ર નિરસશુષ્કજ્ઞાનમાધ્યમેન બ્રહ્માવગતિરસમ્પૂર્ણા । પ્રેમ્ણા ચેતસ ઉત્કર્ષઃ । ઉત્કૃષ્ટે ચેતસિ ભગવતઃ પ્રતિવિમ્બઃ સ્પષ્ટઃ । ભગવન્તં વશીકર્તું ભક્તિં વિના નાન્યત્કિમપિ કારણાન્તરમ્ ।

ઉત્કલભૂમૌ નિગમાનન્દસ્ય પ્રભાવો બલવત્તર આસીત્ । યદિવા નિગમાનન્દ આત્માનમીશ્વરાવતાર ઇતિ કુત્રાપિ નોક્તસ્તથાપિ કતિપયાઽન્તરંગા ભક્તા તમીશ્વરરૂપેણ અદ્યાવધિ પૂજયન્તિ સ્મ । પારમાર્થિકે ઇદં નિગમાનન્દદર્શનં દ્વૈતવાદોપરિ પર્યવસિતમિત્યલં વિવાદેન । ૐ શાન્તિઃ ।

— લેખકઃ - નન્દપ્રદીપ્તકુમારઃ

સહાયકગ્રન્થાઃ

૧- જ્ઞાનિગુરુઃ

૨- યોગિગુરુઃ

૩- તાન્ત્રિકગુરુઃ

૪- પ્રેમિકગુરુઃ

૫- બ્રહ્મચર્યસાધનમ્

૬- ઠાકુરેર ચિઠિ

Written by Dr. Pradipta Kumar Nanda, Kendrapara, Orissa pknanda65 at gmail.com

*Svami Nigamananda in Utkalapradesh*
pdf was typeset on May 14, 2021

Please send corrections to *sanskrit@cheerful.com*